अध्याय :- ४५ Chapter-45

नारद उवाच[१] ।।
तथा बहूदकस्थाने कथामाकर्णयाद्भुताम् ।।
यस्माद्बहुदकं कुण्डं कामरूपे यदस्ति च ।। १

तदस्ति चात्र संक्रांतं तस्मात्प्रोक्तं बहूदकम् ।।
कपिलेनात्र तप्तवा च वर्षाणि सुबहून्यपि ।। २

स्थापितं शोभनं लिंगं कपिलेश्वर संज्ञितम् ।।
तच्च लिंगं सदा पार्थ नन्दभद्र इति स्मृतः ।। ३

[२]वाणिकसंपूजयामास ~~सकर्म~~ त्रिकालं च कृतादरः ।।
सर्वधर्म विशेषज्ञः साक्षाद्धर्म इवापरः ।। ४

[३]नाज्ञातं तस्य किंचिच्च यद्धर्मेषु प्रकीर्त्यते ।।
सर्वेषां च सुत्दन्नित्यं सर्वेषां च हितेरतः ।। ५

कर्मणा मनसा वाचा ~~अ~~ धर्ममेनमुपाश्रितः ।।
न भूतो न भविष्यश्च न स धर्मोऽस्ति किंचन ।। ६

विदोषो यो हि सर्वत्र निश्चित्यैवं व्यवस्थितः ।।
अस्य धर्म समुद्रस्य संप्रवृद्धस्य सर्वतः ।। ७

---

१ अ. श्री नारद ।। ब. श्री नारद उ० ।।
२ अ. ब. वणिक
३ अ. न

निर्मथ्य नन्दभद्रेण आत्त्दतं तन्निशामय ।।
वाणिज्यं मन्यते श्रेष्ठं जीवनाय तदा स्थितः ।। ८

परिच्छिन्नैः[१] काष्ठतृणैः शरणं तेन कारितम् ।।
मद्यवर्जं भेदवर्जं कूटवर्जं समं तथा ।। ९

सर्वं भूतेषु वाणिज्यमल्पलाभेन सोऽचरत् ।।
अमायया परेभ्योऽसौ गृहीत्वैव क्रयाणकम् ।। १०

अमाययैव भूतेभ्यो विक्रीणात्यस्य सद्व्रतम् ।।
केचिद्यज्ञं प्रशंसंति नन्दभद्रो न मन्यते ।। ११

दोषमेनं विनिश्चित्य श्रृणु तं पांडुनन्दन[२] ।।
लुब्धोऽनृती दांभिकश्च स्वप्रशंसापरायणः ।। १२

यजन्यज्ञैर्जगद्वंति स्वं चाधंतमसंनयेत् ।।
अग्नौ[३] प्रास्ताहुतिः[४] सम्यगादित्य मुपतिष्ठते ।। १३

आदित्याज्जायते वृष्टिर्वृष्टेन्नं ततः प्रजाः[५] ।।
यद्यादा यजमानस्य ऋत्विजो द्रव्यमेव च ।। १४

---

१ अ. परच्छिन्जैः ।
२ ब. पांडु नंदनः
३ अ. अग्निं ब. अग्नि
४ ब. प्राप्ता
५ अ. प्रजा

चौर प्रायस्य कलुषाज्जन्म जायेज्जनस्य हि ।।
अदक्षिणे वृथा यज्ञे कृते चाप्यविधानतः ।। १५

पशवो लकुटैर्हन्युर्यजमानं मृतं हताः ।।
तस्माच्छुद्धैर्य वद्द्रव्यैर्यजमानः शुभः[१] स्मृतः ।। १६

यज्ञ एवं[२] विचार्यासौ यज्ञसारं समास्थितः ।।
श्रद्धया देवपूजा या नमस्कारः[३] स्तुतिः शुभा ।। १७

नैवेद्यं हविषश्चैव यज्ञोऽयं हि विकल्मषः ।।
स एव यज्ञः प्रोक्तो वै येन तुष्यन्ति देवताः ।। १८

केचिच्छंसन्ति संन्यासं नन्दभद्रो न मन्यते ।।
यो हि संन्यस्य विषयान्मनसा गृह्यते पुनः ।। १९

उभयभ्रष्ट एवासौ भिन्ना[४] भूमिर्विनश्यति ।।
सन्यासस्य तु यत्सारं ततेनावृत मुत्तमम् ।। २०

कस्यचिन्नैव कर्माणि शपते वा प्रशंसति ।।
नानामार्ग स्थितांल्लोकांश्चन्द्रवल्लीयते क्षितौ ।। २१

---

१ अ. श्रुभः
२ अ. एत
३ ब. नमस्कारम्
४ अ. ब. छिन्ना

न ~~द्वेष्टि~~ द्वेष्टि नो कामयते न विरुद्धो/नुरुध्यते ।।
समाश्म-कांचनो धीरस्तुल्य निंदात्म संस्तुतिः ।। २२

अभयः सर्व भूतेभ्यो यथांधबधिराकृतिः ।।
न कर्मणां फलाकांक्षा शिवस्याराधनं हि तत् ।। २३

कारणाद्धर्ममन्विच्छन्न लोभं च ततश्चरन् ।। २४

विविच्य नंद्रभद्रस्तत्सारं मोक्षेषु जगृहे ।।
कृषिं केचित्प्रशंसंति नंद्रभद्रो न मन्यते ।। २५

यस्यां छिदंति वृषणा वृषाणां चैव नासिकाम्[1] ।।
कर्षयंति महाभारान्बध्नंति दमयंति च ।। २६

बहुदश्मयान्देशान्नयंति बहुकर्दमान् ।।
वाहसंपीडिता धूर्याः[2] सीदंत्य विधिना परे ।। २७

मन्यंते[3] भ्रूणहत्यापि विशिष्टा नास्य कर्मणः ।।
अध्न्या इति गवां नाम श्रुतौ ताः पीडयत्कथम् ।। २८

---

१ ब. नासिका
२ अ. धुर्याः
३ ब. मन्येते

भूमिं भूमिशयांश्चैव हति काष्ठमयो मुखम् ।।
पंचेंद्रियेषु जीवेषु सर्वं वसति दैवतम् ।। २९

आदित्यश्चन्द्रमा वायुः प्रभूत्यैव च तास्तुयः ।।±
विक्रीणाति सुमूढस्य[१] तस्य का नु विचारणा ।। ३०

अजोऽग्निर्वरुणो मेषः सूर्यश्च पृथिवी विराट ।।
धेनुर्वत्सश्च सोमो वै विक्रीयैतान्न सिध्यति ।। ३१

एवंविधसहस्त्रैश्च युता दोषैः कृषिः सदा ।।
अष्टा[२]गवं स्यादि हलं त्रिंशद्भागं त्यजेत्कृषैः ।। ३२

धर्मं दधात्पशून्वृद्धान्पुण्यादेषा कृषिः कृतः ।।
साम्यमेतत्कृषेस्तेन नंद्रभद्रेण चादतम् ।। ३३

विसाधितव्यान्यन्नानि स्वशक्त्या देवपितृषु ।।
मनुष्यद्विज भूतेषु नियुज्याश्नीत सर्वदा[३] ।। ३४

केचित्छंसंति चैश्वर्यं नंद्रभद्रो न मन्यते ।।
मानुषा मानुषानेव दासभावेन[४] भुंजते ।। ३५

---

१ अ. सुमूटस्य ब. सुवुटस्य

२ अ. अष्ट

३ अ. दाः

४ अ. ब. दासमानेन

वध बंध निरोधेन[1] पीडयंति दिवानिशम् ।।
देहं[2] किमेतद्धातुः स्वं मातुर्वा जनकस्य वा[3] ।। ३६

मातुः पितुर्वा बलिनः क्रेतुरग्नेः शुनो ऽपि वा ।।
इति संचित्य [4]व्यहरन्नमरा इव ईश्वराः ।। ३७

ऐश्वर्यमदपापिष्ठा महामद्यमदादयः ।।
ऐश्वर्यमदमत्तो हि ना पतित्वा हि माद्यति ।। ३८

[6]आत्मवत्सर्वं भृत्येषु श्रिया[5] नैव च माद्यति ।। ३९

आत्मप्रत्ययवान्देही कवेश्वरश्वेदशो ऽस्ति हि ।।
ऐश्वर्यस्यापि सारं स जग्राहैतन्निशामय ।। ४०

स्वशक्त्या सर्व भूतेषु यदसौ न पराङ्मुखः ।।
तीर्थयिके[7] प्रशंसंति नंद्रभद्रो न मन्यते ।। ४१

श्रमेण संकरात्ताप शीतवातक्षुधा तृषा ।।
क्रोधश्च धर्मगेहस्य[8] नापि नाशमवाप्नुयात् ।। ४२

---

| | | | | | |
|---|---|---|---|---|---|
| १ | ब. | 'वि' | ५ | अ. | श्रियाः |
| २ | ब. | देहि | ६ | अ. | नात्म |
| ३ | ब. | प्रतौ 'च' पाठः | ७ | ब. | तिर्थण्यके |
| ४ | अ. | विहर | ८ | अ. ब. | गेहेधर्मस्य |

सौख्येन वा धनस्यापि श्रद्धया स्वल्पगौर्थवान् ।।
समर्थो हि महत्पुण्यं शक्त आप्तुंक्व वास्ति सः ।। ४३

सदा शुचिर्देवयानी तीर्थसारं गृहेऽगृहे ।।
नापः पुनंति पापानि न शैला न महाश्रमाः ।। ४४

आत्मा पुनाति पापानि यदि पापान्निवर्तते ।।
एवमेष समाचारं प्रादुर्भूतं ततस्ततः ।। ४५

एकीकृत्य सदा धीमान्नंदभद्रः समास्थितः ।।
तस्यैवं वर्ततः साधोः स्पृहयंत्यपि देवताः ।। ४६

वासवप्रमुखाः[1] सर्वे विस्मयं च परं ययुः ।।
अत्रैव स्थानके चापि शूद्रो भूत्प्रतिवेश्मकः ।। ४७

स नंदभद्रं धर्मिष्ठं पुनः पुनरसूयत ।।
नास्तिकः स दुराचारः सत्यव्रतः[2] इति श्रुतिः ।। ४८

स सदा नंदभद्रस्य विलोक्यति चांतरम् ।।
छिद्रं चेदस्य पश्यामि ततो धर्मान्निवर्तये ।। ४९

---

१ ब. वासवः

२ अ. त

स्वभाव एव क्रूराणां नास्तिकानां दुरात्मनाम् ।।
आत्मानं पातयंत्येव पातयंत्यपरं च यत् ।। ५०

ततस्त्वेवं वर्ततोऽस्य नंदभद्रस्य धीमतः ।।
एकोऽभूत्त नयः कष्टाद्वाधिके सोऽप्यनश्यत ।। ५१

तच्च दैवकृतं मत्वा न शुशोच[1] महामतिः ।।
देवो वा मानवो वापि को हि देवाद्विमुच्यते ।। ५२

ततोऽस्य सुप्रिया भार्या सर्वैः साध्वी गुणैर्युता ।।
गृहधर्मस्य मूर्तिर्या साक्षादिव अरुंधती ।। ५३

विनद्दशमागता पार्थ कनकानाम नामतः ।।
ततोयतें[2] द्रियोऽप्योष [3]गृहधर्म विनाशतः ।। ५४

शुशोच हा कष्टमिति पापोहमिति चासकृत् ।।
ततस्य चांतरं दृष्ट्वा दुष्यत्सत्यव्रतश्चिरात् ।। ५५

उपाव्रज्य च हा कष्टं ब्रुवंस्तं नंदभद्रकम् ।।
दधिकर्ण इवासाद्य नंदभद्रमुवाच सः ।। ५६

---

१ अ. 'अशोच'
२ ब. जितेंद्रियोपोष
३ अ. गहधर्म

हा नंद्रभद्र यद्येवं तवाप्येवंविधं फलम् ।।
एतेन मन्ये मनसि धर्मोऽप्येष वृथैव यत् ।। ५७

इत्यादि बहुधा प्रोच्य तत्तद्वाक्यं ततस्ततः ।।
सत्यव्रतस्ततः प्राह नंदभद्रं कृपान्वितः[१] ।। ५८

नंदभद्र सदा तुभ्यं वक्तुकामोस्मि किंचन ।।
प्रस्तावस्याप्य भावाच्च नोदितं च मया क्वचित् ।। ५९

अप्रस्तावं ब्रुवन्वाक्यं बृहस्पतिरपि ध्रुवम् ।।
लभते बुद्ध्यवज्ञानमवमानं च हीनवत् ।। ६०

नन्दभद्र [२]उवाच ।।
ब्रूहि ब्रूहि न मे किंचित्साधु गोप्यं[३] प्रियं परम् ।।
वचोभिः शुद्धसत्त्वानां न मोक्षोऽप्युपमीयते ।। ६१

सत्यव्रत [४]उवाच ।।
नवभिर्नवभिश्चैव विमुक्तं वाग्विदूषणैः ।।
नवभिर्बुद्धिदोषैश्च वाक्यं वक्ष्याम्य दोषवत् ।। ६२

सौक्ष्म्यं संख्याक्रमश्चापि निर्णयः सप्रयोजनः[५] ।।
पंचैतान्यर्थजातानि यत्र तद्वाक्यमुच्यते ।। ६३

---

१ अ. तम् ।।
२ अ. 'उवाच' नास्ति ।
३ ब. गाष्टि
४ अ. 'उवाच' नास्ति ।
५ ब. सप्तयोजनः

धर्ममर्थं च कामं च मोक्षं चोदिश्य चोप्यते ।।
प्रयोजनमिति प्रोक्तं प्रथमं वाक्य॰लक्षणम् ।। ६४

धर्मार्थ॰काम॰मोक्षेषु प्रतिज्ञाय विशेषतः ।।
इदं तदिति वाक्यानि प्रोच्यते स विनिर्णयः ।। ६५

इदं पूर्वमिदं पश्चादवक्तव्यं यत्क्रमेण हि ।।
क्रमयोगं तमप्याहुर्वाक्यतत्त्वविदो बुधाः ।। ६६

दोषाणां[१] च गुणानां च प्रमाणं प्रविभागतः[२] ।।
उभयार्थमपि प्रेक्ष्य सा संख्येत्युपधार्यताम् ।। ६७

वाक्यशेषेषु भिन्नेषु यत्राभेदः प्रदृश्यते ।।
तत्रातिशय॰हेतुत्वं तत्सौक्ष्म्यमिति निर्दिश्यते ।। ६८

इति वाक्यगुणानां च वाग्दोषान्द्विनव शृणु ।।
अपेतार्थमभिन्नार्थमपवृत्तं तथाधिकम् ।। ६९

अश्लक्ष्णं चापि संदिग्धं पदान्ते गुरु॰चाक्षरम् ।।
पराङ्मुखमुखं यच्च अनुतं चाप्यसंस्कृतम् ।। ७०

---

१ अ. दोषानां

२ अ. ब. प्रतिभागशः

विरुद्धं यत्त्रिवर्गेण न्यूनं कष्टाति शब्दकम् ।।
व्युत्क्रमाभि-दत्तं यच्च सशेषं चाप्यहेतुकम् ।। ७१

निष्कारार्णं[१] च वाग्दोषान्बुद्धिजांछ्रणुत्वं च मर्मज्ञ यान् ।।
कामोत्क्रोधाद्भयाच्चैव लोभदैन्यादनार्यकात् ।। ७२

हीनानुक्रोशतो मानान्न च वक्ष्यामि किंचन[२] ।।
वक्ता श्रोता च वाक्यं च यदा त्वविकलं भवेत् ।। ७३

सममेति विवक्षायां तदा सोऽर्थः प्रकाशते[३] ।।
वक्तव्ये तु यदा वक्ता श्रोतारमवमन्यते ।। ७४

श्रोता चाप्यर्थ[४] वक्तारं तदा वाक्यं न रोहति ।।
अथ यः[५] स्वप्रियं ब्रूयाच्छ्रोतुर्वोत्सृज्ययदतम् ।। ७५

विशंका जायते तस्मिन्वाक्यं तदपि दोषवत् ।।
तस्माद्यः स्वप्रियं[६] त्यक्त्वा श्रोतुश्चाप्यथ यत्प्रियम् ।। ७६

सत्यमेव प्रभाषेत स वक्ता नेतरो भुवि ।।
मिथ्यावादांछास्त्र जाल संभवान्यद्विहाय च ।। ७७

---

१ अ. निः कारणं
२ ब. कंचन
३ अ. प्रकासते
४ ब. वाक्यथ
५ ब. यं
६ अ. सुप्रियं

असत्यमेव व्रतं यस्मात्तस्मात्सत्यव्रतस्त्वहम् ।।
सत्यं ते संप्रवक्ष्यामि मंतुमर्हसि तत्तथा ।। ७८

यदा प्रभृति भद्र त्वं पाषाणस्यार्चने रतः ।।
तदा प्रभृति किंचिच्च न हि पश्यामि शोभनम् ।। ७९

एकः सोऽपि सुतो नष्टो भार्या चार्याऽप्यनश्यत् ।।
कूटानां कर्मणां साधो फलमेवंविधं भवेत् ।। ८०

क्व देवाः संति मिथ्यैतद्दृश्यंते चेद्भवंत्वपि ।।
सर्वा च कूट[1] विप्राणां द्रव्यायैषा विकल्पना ।। ८१

पितॄनुदिश्य यच्छंति मम हासः प्रजायते ।।
अन्नस्योपद्रवं यच्च मृतो हि किम शिष्यत[2] ।। ८२

यत्त्विदं बहुधा मूढा वर्णयंति द्विजाधमाः[3] ।।
विश्वस्य निर्माणमखिलं तथापि[4] शृणु सत्यतः ।। ८३

उत्पत्तिश्चापि भंगश्च विश्वस्य तद्वयं मृषा ।।
एवमेव हि सर्वं च सदिदं वर्तते जगत् ।। ८४

---

१ अ. काट
२ अ. शिष्यतः
३ ब. धामाः
४ ब. तत्रापि

स्वभावतो विश्वमिदं हि वर्तते स्वभावतः सूर्यमुखा भ्रमंत्यमी[1] ।।
स्वभावतो वायवोवांति नित्यं वर्षंति चांबुदोऽयम् ।। ८५

स्वभावतो रोहति धान्यजातं स्वभावतो वर्ष शीतातपत्वम् ।।
स्वभावतः संस्थितामेदिनी च स्वभावतः सरितः संस्त्रवंति[2] ।। ८६

स्वभावतो गर्भिणी संप्रसूते स्वभावतोऽभी बहवश्च जीवाः ।। ८७

यथा [3]स्वभावेन भवंति वक्रा ऋतु स्वभावाद्बदरीषु कंटकाः ।।
तथा स्वभावेन[4] हि सर्वमेतत्प्रकाशते कोऽपि कर्ता न दश्यः ।। ८८

तदेवं संस्थिते लोके मूढो मुह्यति मत्तवत् ।।
मानुष्यमपि तद्धर्ता वदंत्यग्र्यं शृणुष्व तत ।। ८९

~~मर्मनुष्यमपि~~
मानुष्यान्न परं कष्टं वैरिणां[5] नो भवेद्धि तत् ।।
शोकस्थान सहस्त्राणि मनुष्यस्य क्षणे क्षणे ।। ९०

मानुष्यं हि स्मृताकारं सभाग्योऽस्माद्विमुच्यते ।।
पशवः पक्षिणः कीटाः कृमयश्च यथा ~~ब~~ सुखम् ।। ९१

---

१. 'सूर्यमुखा भ्रमंत्यमी' ब. प्रतौ नास्ति ।
२ अ. संश्रवंति
३ अ. स्वभावे हि
४ ब. स्वभावं
५ अ. विरिणां

अबद्धा विहरंत्यैते योनिरेषां सुदुर्लभा ।।
निश्चिंताः[1] स्थावरा ह्ये ते सौख्यमेषां महद्भुवि ।। ९२

बहुना किं मनुष्येभ्यः सर्वो धन्योऽन्य योनिजः[2] ।।
स्वभावमेव जानीहि पुण्यापुण्याविकल्पना ।। ९३

यदेके स्थावराः कीटाः पतंगा मानुषादिकाः ।।
तस्मान्मिथ्या परित्यज्य नंदभद्र यथा सुखम् ।।
पिब क्रीडनकैः सार्धं भोगान्सत्यमिदं भुवि ।। ९४

नारद उवाच ।।[3]
इत्यैतैरमुखैर्वाक्यैरयुक्तै रस मंजसैः ।। ९५

सत्यव्रतस्य नाकम्पयन्नंदभद्रो महामनाः[4] ।।
प्रहसन्निव[5] तं प्राह स्वक्षोभ्यः सागरो यथा ।। ९६

यद्भवानाह धर्मिष्ठाः सदा दुःखस्य भागिनः ।।
तन्मिथ्या दुःखजालानि पश्यामः पापिनामपि ।। ९७

वधबंध परिक्लेशाः पुत्रदारादि पंचता ।।
पापिनामपि द्रश्यंते तस्माद्धर्मो गुरुर्मतः ।। ९८

---

१ अ. ब. 'निश्चिंता'
२ अ. ब. .....निजाः
३ अ. प्रतौ इत्ययं पाठः नास्ति ।
४ अ. महामुनाः
५ ब. प्रहरान्निव

अयं साधु रहा कष्टं कष्टमस्य महाजनाः ।।
साधोर्वदंत्येतदपि पापिनां दुर्लभंत्त्विदम् ।। ९९

दारादिद्रव्य लोभार्थं विशतः[1] पापिनो गृहे ।।
भवार्नोपि विभेत्यस्माद्द्विष्टि कृप्यति तद्यथा ।। १००

यथास्य जगतो ब्रह्म नास्ति हेतुर्महेश्वरः ।।
तद्बाल भाषितं तुभ्यं किं राजानं विना प्रजाः ।। १०१

यच्च ब्रवीषि[2] पाषाणं मिथ्या लिंगं समर्थसि ।।
तद्मर्वोल्लिंग माहात्म्यं वेत्ति नांधो यथा रविम् ।। १०२

ब्रह्मादयः सुरा सर्वे राजानश्च महर्द्धिकाः ।।
मानवा मुनयश्चैव सर्वे लिंगं यजंति च ।। १०३

स्वनामकानि[3] चिह्नानि तेषां लिंगानी संति च ।।
एते किं त्वभवन्मूर्खस्त्वं तु सत्यव्रतः सुधीः[4] ।। १०४

प्रतिष्ठाप्य पुरा ब्रह्मा पुष्करे नीललोहितम् ।।
प्राप्तवान्परमां सिद्धिं ससर्जेमाः प्रजाः प्रभुः ।। १०५

---

१ ब. विशितः
२ ब. प्रविषि
३ अ. स्वनामस्वानि ब. स्वनामस्वानी
४ ब. सधीः

विष्णुनापि [1]निहत्याजौ रावणं पयसांनिधेः ।।
तीरे रामेश्वरं लिंगं स्थापितं चास्ति किं मुघा[2] ।। १०६

वृत्रं हत्वा पुरा शक्रो महेंद्रे स्थाप्य शंकरम् ।।
लिंगं विमुक्तपापोऽथ त्रिदिवेद्यापि मोदते ।। १०७

स्थापयित्वा शिवं सूर्यो गंगासागरसंगमे ।।
निरामयो[3]ऽभूत्सोमश्च प्रभासे पश्चिमोदधौ ।। १०८

काश्यां[4] यमश्च धनदः सह्ये गरुडकश्यपौ ।।
नैमिषे वायुवरुणौ स्थाप्य लिंगं प्रमोदिताः[5] ।। १०९

अस्मिन्नेव स्तंभतीर्थे कुमारेशं गुहो विभुः ।।
लिंगं संस्थापयामास ~~पार्थिवैर्मुनिभिस्तथा~~ ।।
सर्वपाप हरं किं न किम् ।। ११०

एवमन्यैः सुरैर्यानि पार्थिवैर्मुनिभिस्तथा ।।
संस्थापितानी लिंगानि तन्न[6] संख्यातुमुत्सहे ।। १११

पृथिवीवासिनः सर्वे ये च स्वर्गनि वासिनः ।।
पातालवासिनस्तृप्ता जायंते लिंगपूजया ।। ११२

---

१ अ. न
२ अ. मुधाः
३ ब. नरामयो
४ अ. कास्यौं
५ अ. ब. प्रमादतः
६ अ. तान्न

यच्च ब्रवीषि गीर्वाणा न संति सन्ति चेतकृतः ।।[१]
कुत्रापिक नैव दृश्यंते तेन मे विस्मयो महान् ।। ११३

रंकवत्किं स्म ते देवा याचंतां त्वां कुलत्थवत् ।।
यमिच्छसि महाप्राज्ञ [२]साधको हि गुरुस्तव ।। ११४

स्वभावान्नैव स्वार्थाः संसिद्धा यदि ते मते[३] ।।
भोजनादि[४] कथं सिध्येद्बुद कर्तारमं तरा: ।। ११५

बदरी मंतरेणापि दृश्यंते कण्टका न हि ।।
तस्मात्कस्याऽस्ति निर्माणं यस्ययावत्तथैव तत् ।। ११६

यच्च[५] ब्रवीषि पश्वाद्याः सुखिनो धन्यकास्त्वमी ।।
त्वदते नेदमुक्तं च केनापि श्रुतमेव वा ।। ११७

तामसा विकला ये च कष्टं तेषां च श्लाध्यताम् ।।
सर्वेंऽद्रिययुताः श्रेष्ठाः[६] कुतो धन्या न मानुषाः ।। ११८

सत्यं तवऽव्रतं मन्ये नरकायत्वयाऽऽदतम् ।।
अत्यन्थे न भीः कार्या कामोयं भविताचरात् ।। ११९

---

१ ब. च कृतः
२ अ. साधुः को हि
३ अ. मतौ
४ अ. ब. 'भोजनानि'
५ ब. पंच
६ अ. श्रेष्टाः

आदावाडंबरेणैव ब्रुवतोऽज्ञानमेव मे ।।
इत्थं निःसारिता व्यक्तमादावाडंबरात्तु यत् ।। १२०

मायाविनां हि ब्रुवतां वाक्यं चाडंबरावृतम् ।।
कुनाणकमिवोद्दीप्तं परीक्ष्यं सदा सताम्[१] ।। १२१

आदौ मध्ये तथा चांते येषां वाक्यमदोषवत् ।।
कषदाहैः[२] स्वर्णमिव च्छेदेऽपि स्याच्छुभं शुभम् ।। १२२

त्वयान्यथा प्रतिज्ञातमुक्तं चैवान्यथा पुनः ।।
त्वद्दोषो नायमस्माकं तद्वचः श्रृणुमो हि ये ।। १२३

नास्तिकानां च सर्पाणां विषस्य च गुणास्त्वयम[३] ।।
मोहयंति परं यच्च दोषो नैष परस्य तु ।। १२४

आपो वस्त्रं तिलास्तैलं गंधो वास यथा तथा ।।
पुष्पाणामधिवासेन तथा संसर्गजा गुणाः ।। १२५

मोहजालस्य यो योनिर्मूढैरिह समागमः ।।
अहन्यहनि धर्मस्य योनिः साधु समागमः ।। १२६

---

१ ब. गतां
२ अ. कासदा हैः
३ ब. गुणास्वयं

तस्मात्प्राज्ञैश्च वृद्धैश्च [1]शुद्धभावै स्तपस्विभिः ।।
सद्भिश्च सह संसर्गः कार्यः शम परायणैः ।। १२७

न नीचैर्नाप्य विद्वद्भिर्नानात्मज्ञैर्विशेषतः ।।
येषां[2] त्रीण्यवदातानि योनिर्विद्या च कर्म च ।। १२८

तांश्च सेवेद्विशेषेण शास्त्रं येषां हि विद्यते ।।
असतां दर्शनस्पर्श [3]संजल्पासन भोजनैः ।। १२९

धर्माचारात्प्रहीयंते न च सिध्यंति मानवाः ।।
बुद्धिश्च हीयते पुंसां नीचैः सह समागमात् ।। १३०

मध्यैश्च मध्यतां याति श्रेष्ठतां याति चोत्तमैः ।।
इति धर्म स्मरन्नाहं संगमार्थी पुनस्तव ।। १३१

वेदाः प्रमाणं स्मृतयः प्रमाणं धर्मार्थ युक्तं वचनं प्रमाणम् ।।
नैतत्रयं यस्य भवेत्प्रमाणंकस्तस्य कुर्याद्विवचनं प्रमाणम् ।। १३२

इतीरयित्वा वतनं महात्मा स नंदभद्रः सहसा तदैव ।।
गृहाद्विनीः सृत्य जगाम पुण्यं बहूदकं भद्रवेस्तु कुंडम् ।। १३३

*४ इति श्री स्कांदे......कपिलेश्वर तीर्थ माहात्म्ये नंदभद्रवणिग्वृत्तान्त वर्णनं –
–नाम पंचत्वारिंशत्तमो/ध्यायः।।

---

१ अ. शुद्ध....
२ ब. एषां
३ अ. संजल्पन महासनैः ।। ब. संजल्पन सहासनैः ।।
*४ अ. इति कुमारिका खंड ।।
ब. इति श्री स्कंद पुराणे कुमारिका खंडे पंचचत्वारिंशोध्यायः ।।४५।।